# Shakraproktam Surya Ashtottarashata Nama Stotram

# શક્રપ્રોક્તં સૂર્યાષ્ટોત્તરશતનામસ્તોત્રમ્

## Document Information

Text title : Shakraproktam Surya Ashtottarashata Nama Stotram 5

File name : shakraproktaMsUryAShTottarashatanAmastotram.itx

Category : navagraha, skandapurANa, aShTottarashatanAma, stotra

Location : doc_z_misc_navagraha

Proofread by : PSA Easwaran

Description/comments : skandapurANa | prabhAsakhaNDa | adhyAya 279/5-19||

Latest update : September 6, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 6, 2025

*sanskritdocuments.org*

# શક્રપ્રોક્તં સૂર્યાષ્ટોત્તરશતનામસ્તોત્રમ્

ધૌમ્યેન તુ યથાપૂર્વં પાર્થાય સુમહાત્મને ॥ ૪॥

નામાષ્ટશતમાખ્યાતં તચ્છૃણુષ્વ મહામતે ।

ૐ સૂર્યોઽર્યમા ભગસ્ત્વષ્ટા પૂષાઽર્કઃ સવિતા રવિઃ ॥ ૫॥

ગભસ્તિમાનજઃ કાલો મૃત્યુર્દ્ધાતા પ્રભાકરઃ ।
પૃથિવ્યાપશ્ચ તેજશ્ચ ખં વાયુશ્ચ પરાયણઃ ॥ ૬॥

સોમો બૃહસ્પતિઃ શુક્રો બુધોઽઙ્ગારક એવ ચ ।
ઇન્દ્રો વિવસ્વાન્દીપ્તાંશુઃ શુચિઃ સૌરિઃ શનૈશ્ચરઃ ॥ ૭॥

બ્રહ્મા રુદ્રશ્ચ વિષ્ણુશ્ચ સ્કન્દો વૈશ્રવણો યમઃ ।
વૈદ્યુતો જાઠરશ્ચાગ્નિરિન્ધનસ્તેજસાં પતિઃ ॥ ૮॥

ધર્મધ્વજો વેદકર્ત્તા વેદાઙ્ગો વેદવાહનઃ ।
કૃતં ત્રેતા દ્વાપરશ્ચ કલિઃ સર્વામરાશ્રયઃ ॥ ૯॥

કલાકાષ્ઠામુહૂર્ત્તાશ્ચ પક્ષા માસા અહર્નિશાઃ ।
સંવત્સરકરોઽશ્વત્થઃ કાલચક્રો વિભાવસુઃ ॥ ૧.૨૭૯.૧૦॥

પુરુષઃ શાશ્વતો યોગી વ્યક્તાવ્યક્તઃ સનાતનઃ ।
લોકાધ્યક્ષઃ પ્રજાધ્યક્ષો વિશ્વકર્મા તમોનુદઃ ॥ ૧૧॥

વરુણઃ સાગરોંશુશ્ચ જીવન્તો જીવનોઽરિહા ।
ભૂતાશ્રયો ભૂતપતિઃ સર્વભૂતનિષેવિતઃ ॥ ૧૨॥

સ્રષ્ટા સંવર્ત્તકો વહ્નિઃ સર્વસ્યાદિકરોઽમલઃ ।
અનન્તઃ કપિલો ભાનુઃ કામદઃ સર્વતોમુખઃ ॥ ૧૩॥

જયો વિષાદો વરદઃ સર્વધાતુનિષેવિતઃ ।
સમઃ સુવર્ણો ભૂતાદિઃ શીઘ્રગઃ પ્રાણધારકઃ ॥ ૧૪॥

ધન્વન્તરિર્ધૂમકેતુરાદિદેવોઽદિતેઃ સુતઃ ।
દ્વાદશાત્માઽરવિન્દાક્ષઃ પિતા માતા પિતામહઃ ॥ ૧૫॥

સ્વર્ગદ્વારં પ્રજાદ્વારં મોક્ષદ્વારં ત્રિવિષ્ટપમ્ ।
દેહકર્ત્તા પ્રશાન્તાત્મા વિશ્વાત્મા વિશ્વતોમુખઃ ।
ચરાચરાત્મા સૂક્ષ્માત્મા મૈત્રેણ વપુષાઽન્વિતઃ ॥ ૧૫॥

એતદ્વૈ કીર્તનીયસ્ય સૂર્યસ્યામિતતેજસઃ ।
નામ્નામષ્ટોત્તરશતં પ્રોક્તં શક્રેણ ધીમતા ॥ ૧૭॥

ઇતિ શ્રીસ્કન્દપુરાણે પ્રભાસખણ્ડે પ્રભાસક્ષેત્રમાહાત્મ્યે
એકોનાશીત્યધિકદ્વિશતતમાધ્યાયાન્તર્ગતં શક્રપ્રોક્તં
સૂર્યાષ્ટોત્તરશતનામસ્તોત્રં સમાપ્તમ્ ।

સ્કન્દપુરાણ । પ્રભાસખણ્ડ । અધ્યાય ૨૭૯/૫-૧૯॥

skandapurANa . prabhAsakhaNDa . adhyAya 279/5-19..

Proofread by PSA Easwaran

---

*Shakraproktam Surya Ashtottarashata Nama Stotram*

pdf was typeset on September 6, 2025

Please send corrections to *sanskrit@cheerful.com*